तारिका, स्त्री, (तारस्तीव्रतास्या अस्तीति । तार + "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) तालरसः । ताड़ी इति भाषा । यथा,—
"सम्विदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम् ।
अहिफेनं खर्ज्जुरसस्तारिका तरिता तथा ॥"
इति कुलार्णवतन्त्रम् ॥
(तरणमूल्ये, स्त्री । यथा, मनुः । ८ । ४०७ ।
"गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः ।
ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे ॥")

तारिणी स्त्री, (तारयतीति । तॄ + णिच् + णिनिः ङीप् च ।) बुद्धदेवशक्तिभेदः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओँकारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्डशेषः ॥*॥ द्वितीया शक्तिः । यथा,—
"अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान् ।
येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः ॥
कवितां लभते शुद्धामनर्गलविजृम्भिणीम् ।
पाण्डित्यं सर्व्वशास्त्रेषु धनैर्धनपतिर्भवेत् ॥
राजद्वारे सभायाञ्च विवादे व्यवहारके ।
सर्व्वत्र जयमाप्नोति बृहस्पतिरिवापरः ॥"
इति तन्त्रसारः ॥
अस्या ध्यानं ताराशब्दे द्रष्टव्यम् ॥
("तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती ।
कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृता ॥"
इति मन्त्रकोषः ॥
त्रि, उद्धारकर्त्री । यथा, मार्कण्डेये ।
"तारिणी भवसंसारसागरस्य कुलोद्भवे ! ॥")

तारुण्यं, क्ली, (तरुणस्य भावः । तरुण + ब्राह्मणादित्वात् ष्यञ् ।) यौवनम् । इत्यमरः । २ । ६ । ४० ॥ (यथा, मार्कण्डेये । २४ । ७ ।
"लक्षकोटिसमं वित्तं तारुण्याद्वित्तकोटिषु ॥")

तारेयः, पुं, (ताराया वालिपत्न्या अपत्यं पुमान् ।) तारा + ढक् ।) वालिपुत्त्रः । इति जटाधरः ॥ (यथा, रामायणे । ४ । २२ । १२ ।
"अतुल्यानि कर्म्माणि विक्रम्य बलवान् रणे ।
करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः ॥"
बृहस्पतिपत्न्यास्तारायाः पुत्त्रो बुधोऽपि ॥)

तार्किकः, त्रि, (तर्कं वेत्ति अधीते वा । तर्क + ठक् ।) तर्कशास्त्रवेत्ता । तर्काध्ययनकर्त्ता । इति व्याकरणम् ॥ स षड्विधो यथा । वैशेषिकः १ औलूक्यः २ वार्हस्पत्यः ३ नास्तिकः ४ लौकायतिकः ५ चार्व्वाकः ६ । इति हेमचन्द्रः ॥ (यथा, अप्पयदीक्षित-वैराग्यशतके । ६१ ।
"कोपो मैत्रावरुणेः शापो वा तार्किकस्य मुनेः ।
संक्रमते यदि सकृच्चोरपि मास्तु शङ्कपदम् ॥")

तार्क्षः, पुं, (तृक्ष एव । स्वार्थे अण् ।) कश्यपः । यथा, श्रीभागवते ।
"प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ।
पश्यतां सर्व्वलोकानां तार्क्षपुत्त्रः सुधामिव ॥"
(विनतायां जातः कश्यपपुत्त्रविशेषः । यथा, महाभारते । १ । १२३ । ७० ।
"तार्क्षश्चारिष्टनेमिश्च गरुड़श्चामितध्वजः ।
अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः ॥")

तार्क्षी, स्त्री, (तार्क्ष + गौरादित्वात् ङीष् ।) पातालगरुड़ीलता । इति राजनिर्घण्टः ॥

तार्क्ष्यं, क्ली, रसाञ्जनम् । इति मेदिनी । ये, २७ ॥ (यथास्य पर्य्यायाः वैद्यकरत्नमालायाम् ।
"तार्क्ष्यं शैलं नीलवर्णमञ्जनञ्च रसाञ्जनम् ॥")

तार्क्ष्यः, पुं, (तार्क्षस्य कश्यपस्य अपत्यम् । तार्क्ष + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) अश्वः । सर्पः । गरुड़ाग्रजः । गरुड़ः । इति मेदिनी । रे, २७ ॥ (यथा, रघुः ।६।४९।
"त्रस्तेन तार्क्ष्यात् किल कालियेन
मणिं विसृष्टं यमुनौकसा यः ॥"
तथाच ऋग्वेदे । १ । ८९ । ६ ।
"स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः
स्वस्तिनो बृहस्पतिर्दधातु ॥"
"वृषस्य पुत्त्रो गरुत्मान् नोऽस्माकं स्वस्ति अविनाशं विदधातु ।" इति तद्भाष्ये सायनः ॥
"तार्क्ष्यो रथो गरुड़ो वा नः स्वस्ति दधातु ॥"
इति वाजसनेयसंहिताभाष्ये महीधरः । २५ । १९ ॥ वृषसुनेर्गोत्रापत्यम् । यथा, महाभारते । ३ । १८४ । ८ ।
"जगुश्चारिष्टनेमोऽथ तार्क्ष्यस्याश्रममञ्जसा ॥"
तथाच तत्रैव । १२ । २८८ । ४ ।
"एवमुक्तस्तदा तार्क्ष्यः सर्व्वशास्त्रविदां वरः ।
विबुध्य सम्पदश्चाग्र्यां तद्वाक्यमिदमब्रवीत् ॥")
शालवृक्षः । स्वर्णम् । इति शब्दरत्नावली ॥ अश्वकर्णवृक्षः । स्यन्दनम् । इति हेमचन्द्रः । ४ । २९८ ॥ (क्षत्त्रियविशेषः । यथा, महाभारते । २ । ५१ । १५ ।
"अम्बष्ठाः कौकुरास्तार्क्ष्या वस्त्रपाः पह्लवैः सह ॥"
महादेवः । यथा, महाभारते ।१३।१७।९७ ।
"गन्धर्व्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ॥"
पर्व्वतविशेषः । इति कश्चित् ॥)

तार्क्ष्यजं, क्ली, (तार्क्ष्यः सुवर्णं तद्वत् जायते । यद्वा, तार्क्ष्ये पर्व्वते जायते इति । जन + डः ।) रसाञ्जनम् । इति भावप्रकाशः ॥

तार्क्ष्यध्वजः, पुं, (तार्क्ष्यो गरुड़ः ध्वजे यस्य ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥

तार्क्ष्यनायकः, पुं, (तार्क्ष्याणां सर्पाणां नायकः प्रापकः । स्वमातुर्दासत्वकाले विमातृपुत्त्रसर्पाणां वहनात् तथात्वम् ।) गरुड़ः । इति राजनिर्घण्टः ॥ (तार्क्ष्यनाशकः । इति कश्चित् ॥)

तार्क्ष्यप्रसवः, पुं, (तार्क्ष्ये पर्व्वते प्रसवोऽस्य ।) अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥

तार्क्ष्यशैलं, क्ली, (तार्क्ष्यशैले भवम् । अण् ।) रसाञ्जनम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ;
"सिन्दूरतं चक्रमर्द्दस्य बीज-
मिक्षूद्भवं केशवं तार्क्ष्यशैलम् ॥")

तार्क्ष्यी, स्त्री, (तार्क्ष्यस्य पक्षिणः प्रिया । अण् ङीप् च ।) वनलताविशेषः । इति शब्दरत्नावली ॥

तालं, क्ली, (तलत्यनेनेति । तल प्रतिष्ठायाम् + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) हरितालम् । (अस्य नामानि यथा,—
"हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जकं रोमहरणं तालकं पातमित्यपि ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)
तालीशपत्त्रम् । इति राजनिर्घण्टः ॥ दुर्गासिंहासनम् । इति हेमचन्द्रः । ४ । २०२ ॥ (तालस्य विकारः । "तालादिभ्योऽण् ।" ४ । ३ । १५२ । इत्यस्य तालाद्धनुषि इति वार्त्तिकोक्त्या अण् । धनुः । इति सिद्धान्तकौमुदी ॥ तालस्येदम् । अण् तस्य लुक् ।) तालफलम् ॥ (यथा, महाभारते । ३ । १०१ । ५ ।
"शिरोभिः प्रपतद्भिश्चाप्यन्तरीक्षात् महीतलम् ।
तालैरिव महाराज ! वृन्ताद्भ्रष्टैरदृश्यत ॥")

तालः, पुं, (तलत्यत्र । तल + "हलश्च ।"३।३।१२१। इति घञ् ।) वृक्षविशेषः । तत्पर्य्यायः । तालद्रुमः २ पत्री ३ दीर्घस्कन्धः ४ ध्वजद्रुमः ५ तृणराजः ६ मधुरसः ७ मदाढ्यः ८ दीर्घपादपः ९ चिरायुः १० तरुराजः ११ दीर्घपत्रः १२ गुच्छपत्रः १३ आसवद्रुः १४ । इति राजनिर्घण्टः ॥ लेख्यपत्रः १५ महोन्नतः १६ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहश्रमापहत्वञ्च ॥*॥ अस्य रसगुणाः । कफपित्तदाहशोफनाशित्वम् । मदकारित्वञ्च ॥*॥ तत्फलगुणाः । शीतलत्वम् । बल्यत्वम् । स्निग्धत्वम् । स्वादुरसत्वम् । गुरुत्वम् । विष्टम्भित्वम् । वातपित्तास्रक्षतदाहक्षयनाशित्वञ्च । इति राजनिर्घण्टः ॥ पित्तरक्तश्लेष्मविवर्द्धनत्वम् । दुर्ज्जरत्वम् । बहुमूत्रत्वम् । तन्द्राभिष्यन्दिशुक्रदात्वञ्च । इति भावप्रकाशः ॥ वातक्रमिकुष्ठरक्तपित्तनाशित्वम् । बृंहणत्वम् । वृष्यत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥*॥ तद्बीजस्य अर्थात् तालशस्यस्य गुणाः । मूत्रकरत्वम् । मिष्टत्वम् । वातपित्तहरत्वम् । गुरुत्वञ्च ॥*॥ तदस्थिमज्जगुणाः । मधुरत्वम् । मूत्रलत्वम् । शीतलत्वम् । गुरुत्वञ्च ॥*॥ तालाम्बुगुणाः । पित्तनाशित्वम् । शुक्रस्तन्यवृद्धिकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥ तालजतरुणतोयगुणाः । अतिशयमदकारित्वम् । तदेवाम्लीभूतं पित्तवातदोषकृत् । इति भावप्रकाशः ॥ कफक्रमिहरत्वम् । रुच्यत्वम् । वातलत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः ॥*॥ तालप्रलम्बगुणाः । रुच्यत्वम् । क्षतरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥*॥ तालतरुणमज्जगुणाः । क्रिमिमदकरत्वम् । लघुत्वम् ।